# shrItripurasundarI sAnnidhyastavaH

# શ્રીત્રિપુરસુન્દરી સાન્નિધ્યસ્તવઃ

## Document Information

Text title : shrItripurasundarIsAnnidhyastavaH

File name : tripurasundarIsAnnidhyastava.itx

Category : devii, dashamahAvidyA, stotra, devI, stava

Location : doc_devii

Transliterated by : Pankaj Dubey dr.pankaj.dubey at gmail.com

Proofread by : Pankaj Dubey dr.pankaj.dubey at gmail.com

Latest update : April 15, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીત્રિપુરસુન્દરી સાન્નિધ્યસ્તવઃ

॥ ક ॥

કલ્પ-ભાનુ સમાન-ભાસ્વર-ધામ-લોચન-ગોચરમ્
કિં કિમિત્યતિ-વિસ્મિતે મયિ પશ્યતીહ સમાગતામ્ ।
કાલ-કુન્તલ-ભાર-નિર્જિત-નીલ-મેઘ-કુલાં પુરઃ
ચક્ર-રાજ-નિવાસિનીં ત્રિપુરેશ્વરીમવલોકયે ॥ ૧॥

॥ એ ॥

એક-દન્ત-ષડાનનાદિભિરાવૃતાં જગદીશ્વરીમ્
એનસાં પરિ-પન્થિનિમહમેક-ભક્તિ-મદર્ચિતામ્ ।
એક-હીન-શતેષુ જન્મસુ સઞ્ચિતાત્ સુકૃતાદિમામ્
ચક્ર-રાજ-નિવાસિનીં ત્રિપુરેશ્વરીમવલોકયે ॥ ૨॥

॥ ઈ ॥

ઈદૃશીતિ ચ વેદ-કુન્તલ-વાગ્ભિરપ્ય નિરૂપિતામ્
ઈશ-પઙ્કજ-નાભ-સૃષ્ટિ-કૃદાદિ-વન્દ્ય-પદામ્બુજામ્ ।
ઈક્ષણાન્ત-નિરીક્ષણેન મદિષ્ટદાં પુરતોઽધુના
ચક્ર-રાજ-નિવાસિનીં ત્રિપુરેશ્વરીમવલોકયે ॥ ૩॥

॥ લ ॥

લક્ષણોજ્જવલ-હાર-શોભિ-પયોધર-દ્વય-કૈતવાત્
લીલયૈવ દયા-રસ-સ્રવદુજ્જ્વલત્-કલશાન્વિતામ્ ।
લાક્ષયાઙ્કિત-પાદપાતિ-મિલિન્દ-સન્તતિમગ્રતઃ,
ચક્ર-રાજ-નિવાસિનીં ત્રિપુરેશ્વરીમવલોકયે ॥ ૪॥

॥ હ્રીં ॥

હ્રીમિતિ પ્રતિ-વાસરં જપ-સુસ્થિરોઽહમુદારયા

યોગિ-માર્ગ-નિરૂઢયૈક્ય-સુભાવનાં ગતયા ધિયા ।
વત્સ ! હર્ષમવાપ્ન-વત્યહમિત્યુદાર-ગિરં પુરઃ
ચક્ર-રાજ-નિવાસિનીં ત્રિપુરેશ્વરીમવલોકયે ॥ ૫॥

॥ હ॥

હંસ-વૃન્દમલક્તકારુણ-પાદ-પઙ્કજ-નુપુર-
ક્વાણ-મોહિતમાદરાદનુ-ધાવિતં મૃદુ શ ृण્વતીમ્ ।
હંસ-મન્ત્ર-મહાર્થ-તત્ત્વ-મયીં પુરો મમ ભાગ્યતઃ
ચક્ર-રાજ-નિવાસિનીં ત્રિપુરેશ્વરીમવલોકયે ॥ ૬॥

॥ સ॥

સઙ્ગતં જલમભ્ર-વૃન્દ-સમુદ્ભવં ધરણી- ધરાદ્
ધારયા વહદગ્જસા ભ્રમમાપ્ય સૈકત-નિર્ગતમ્ ।
એવમાદિ-મહેન્દ્ર-જાલ-સુકોવિદાં પુરતોઽધુના
ચક્ર-રાજ-નિવાસિનીં ત્રિપુરેશ્વરીમવલોકયે ॥ ૭॥

॥ ક॥

કમ્બુ- સુન્દર-કન્ધરાં કચ-વૃન્દ-નિર્જિત-વારિદામ્
કણ્ઠ-દેશ-લસત્ -સુમઙ્ગલ-હેમ-સૂત્ર-વિરાજિતામ્ ।
કાદિ-મન્ત્રમુપાસતાં સકલેષ્ટદાં મમ સન્નિધૌ,
ચક્ર-રાજ-નિવાસિનીં ત્રિપુરેશ્વરીમહમાશ્રયે ॥ ૮॥

॥ હ॥

હસ્ત-પદ્મ-લસત્-ત્રિખણ્ડ-સમુદ્રિકામહમદ્રિજામ્
હસ્તિ-કૃત્તિ-પરીત-કાર્મુક-વલ્લરી-સમ-ચિલ્લિકામ્ ।
હર્યજ-સ્તુત-વૈભવાં ભવ-કામિનીં મમ ભાગ્યતઃ
ચક્ર-રાજ-નિવાસિનીં ત્રિપુરેશ્વરીમહમાશ્રયે ॥ ૯॥

॥ લ॥

લક્ષણોલ્લસદઙ્ગ-કાન્તિ-ઝરી-નિરાકૃત-વિદ્યુતમ્
લાસ્ય-લોલ-સુવર્ણ-કુણ્ડલ-મણ્ડિતાં જગદમ્બિકામ્ ।
લીલયાઽખિલ-સૃષ્ટિ-પાલન-કર્ષણાદિ-વિતન્વતીમ્
ચક્ર-રાજ-નિવાસિનીં ત્રિપુરેશ્વરીમહમાશ્રયે ॥ ૧૦॥

॥ હ્રીં ॥

હ્રીંમિતિ ત્રિપુરા-મનુ-સ્થિર-ચેતસા બહુધાઽર્ચિતામ્
હાદિ-મન્ત્ર-મહામ્બુ-જાત-વિરાજમાન-સુહંસિકામ્ ।
હેમ-કુમ્ભ-ઘન-સ્તનાં ચલ-લોલ-મૌક્તિક-ભૂષણામ્
ચક્ર-રાજ-નિવાસિનીં ત્રિપુરેશ્વરીમહમાશ્રયે ॥ ૧૧ ॥

॥ સ ॥

સર્વ-લોક-નમસ્કૃતાં જિત-શર્વરી-રમણાનનામ્
શરવ-દેવ-મનઃ - પ્રિયાં નવ-યૌવનોન્મદ-ગર્વિતામ્ ।
સર્વ-મઙ્ગલ-વિગ્રહાં મમ પૂર્વ-જન્મ-તપો-બલાત્
ચક્ર-રાજ-નિવાસિનીં ત્રિપુરેશ્વરીમહમાશ્રયે ॥ ૧૨ ॥

॥ ક ॥

કન્દ-મૂલ-ફલાશિભિર્બહુ-યોગિભિશ્ચ ગવેષિતામ્
કુન્દ-સુન્દર-દન્ત-પંક્તિ-વિરાજિતામપરાજિતામ્ ।
કન્દમાગમ-વીરૂધાં સુર-સુન્દરીભિરિહાગતામ્
ચક્ર-રાજ-નિવાસિનીં ત્રિપુરેશ્વરીમહમાશ્રયે ॥ ૧૩ ॥

॥ લ ॥

લ-ત્રયાઙ્કિત-મન્ત્ર-રાટ્-સમલંકૃતાં જગદમ્બિકામ્
લોલ-નીલ-સુકુન્તલાવલિ-નિર્જિતાલિ-કદમ્બકામ્ ।
લોભ-મોહ-વિદારણીં કરુણા-મયીમરુણાં શિવામ્
ચક્ર-રાજ-નિવાસિનીં ત્રિપુરેશ્વરીમહમાશ્રયે ॥ ૧૪ ॥

॥ હ્રીં ॥

હ્રીં-પરાખ્ય-મહા-મનોરધિ-દેવતાં ભુવનેશ્વરીમ્
હૃત્-સરોજ-નિવાસિનીં હર-વલ્લભાં બહુ-રૂપિણીમ્ ।
હાર-કુણ્ડલ-નૂપુરાદિભિરન્વિતાં પુરતોઽધુના
ચક્ર-રાજ-નિવાસિનીં ત્રિપુરેશ્વરીમહમાશ્રયે ॥ ૧૫ ॥

॥ શ્રીં ॥

શ્રીં સુ-પઞ્ચ-દશાક્ષરીમપિ ષોડશાક્ષર-રૂપિણીમ્
શ્રી-સુધાર્ણવ-મધ્ય-શોભિ-સરોજ-કાનન-ચન્દ્રિકામ્ ।

શ્રીગુહ-સ્તુત-વૈભવાં પર-દેવતાં મમ સન્નિધૌ
ચક્ર-રાજ-નિવાસિનીં ત્રિપુરેશ્વરીમહમાશ્રયે ॥ ૧૬॥

॥ ઇતિ શ્રીત્રિપુરસુન્દરી સાન્નિધ્યસ્તવ સમ્પૂર્ણા ॥

Encoded and proofread by Pankaj Dubey dr.pankaj.dubey at gmail.com

*shrItripurasundarI sAnnidhyastavaH*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*